चतुःकोणं द्विजाग्र्यस्य त्रिकोणं क्षत्त्रियस्य तु ।
द्विकोणाकृति वैश्यस्य शूद्रस्य वर्त्तुलं सदा ॥”
इत्यादौ वह्निपुराणे आह्निकतपोनामाध्यायः ॥

मण्डलं, त्रि, बिम्बम् । इत्यमरः।१।३।१५॥ हि चन्द्रस्य शरीरे उपचारादादित्यस्य च । वेति शोभते बिम्बः शोभकान्तिगत्यादौ वाम्नोति बिम्बः । बिम्बति भाति बिम्बः । सौत्रोऽयमिति स्वामी । मण्डयति मण्डलं वाम्नोति अलः स्त्रियां नदादित्वात् मण्डली च । इति भरतः ॥

मण्डलः, पुं, (मण्डं लाति गृह्णातीति । ला + कः ।) कुक्कुरः । इति मेदिनी । ले, १२१ ॥ सर्पविशेषः । इति विश्वः ॥ (देहस्थाष्टप्रकारसन्ध्यन्तर्गतसन्धिविशेषः । “त एते सन्धयोऽष्टविधाः । कोरोदूखल-सामुद्ग-प्रतर-तुन्नसेवनीवायसतुण्ड-मण्डल-शङ्खावर्त्ताः ।” ‘कण्ठहृदयनेत्रक्लोमनाडीषु मण्डलाः ।’ इति सुश्रुते शारीरस्थाने पञ्चमेऽध्याये ॥)

मण्डलकं, क्ली, (मण्डल । स्वार्थे कन् ।) बिम्बम् । कुष्ठभेदः । दर्पणम् । इति मेदिनी । के, २०७॥ मण्डलाकारव्यूहः । इति जटाधरः ॥

मण्डलकः, पुं, (मण्डल । स्वार्थे कन् ।) कुक्कुरः । इति धरणिः ॥

मण्डलनृत्यं, क्ली, (मण्डलेन मण्डलाकारेण प्रवर्त्तितं नृत्यमिति नित्यसमासः ।) मण्डलाकारनृत्यम् । तत्पर्य्यायः । हल्लीषः २ ॥ इति शब्दमाला ॥

मण्डलपत्त्रिका, स्त्री, (मण्डलं मण्डलाकारं पत्त्रं यस्याः । कन् । टाप् । अत इत्वञ्च ।) रक्तपुनर्नवा । इति राजनिर्घण्टः ॥ (गुणादयोऽस्या रक्तपुनर्नवाशब्दे ज्ञातव्याः ॥)

मण्डलाग्रः, पुं, (मण्डलं गोलाकारं अग्रं यस्य ।) खड्गः । इत्यमरः । २ । ८ । ८९ ॥ (यथा, सुश्रुते सूत्रस्थाने अष्टमेऽध्याये ॥ तत्र मण्डलाग्रकरपत्त्रे स्यातां छेदने लेखने च ।)

मण्डलायितं, क्ली, (मण्डलवदाचरितमिति । मण्डल + क्यङ् । दीर्घः । मण्डलाय नामधातुः क्तः ।) वर्त्तुलम् । इति शब्दरत्नावली ॥

मण्डलाधीशः, पुं, (मण्डलस्य अधीशः ।) मण्डलेश्वरः । तत्पर्य्यायः । मध्यमः २ । इति हेमचन्द्रः ॥

मण्डली, [न्] पुं, (मण्डलं कुण्डलनं कुण्डलाकारेण शरीरवेष्टनमस्यास्तीति । मण्डल + इनिः ।) सर्पः । इति त्रिकाण्डशेषः ॥ विडालः । इति शब्दमाला ॥ वाहकः । इति हेमचन्द्रः ॥ खड्गाश इति भाषा ॥ वटवृक्षः । गोनाशसर्पः । इति राजनिर्घण्टः ॥

मण्डली, स्त्री, (मण्डलमस्त्यस्या इति । अर्श आद्यच् । गौरादित्वात् ङीष् ।) दूर्व्वा । इति हारावली ॥ (स्त्री, गुडूची ॥ तत्पर्य्यायो यथा,
“गुडूची मधुपर्णी स्यादमृतामृतवल्लरी ।
छिन्ना छिन्नरुहा छिन्नोद्भवा वत्सादनीति च॥
जीवन्ती तन्त्रिका सोमा सोमवल्ली च कुण्डली ।
चक्रलक्षणिकाधीरा विशल्या च रसायनी ॥
चन्द्रहासी वयस्था च मण्डली देवनिर्म्मिता ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मण्डलेशः, पुं, (मण्डलस्य ईशः ।) मण्डलेश्वरः । तत्पर्य्यायः । एकजन्मा २ भयापहः ३ । इति त्रिकाण्डशेषः ॥

मण्डलेश्वरः, पुं, (मण्डलस्य ईश्वरः ।) भूम्येकदेशाधिपः । अन्यो भूम्येकदेशाधिपो मण्डलेश्वरः स्यात् मण्डलस्य अरिमित्रादिरूपस्य देशस्य ईश्वरो मण्डलेश्वरः । एकदेशाधिप इत्यर्थः । स्यान्मण्डलं द्वादशराजके च देशे च बिम्बे च कदम्बके च । इति विश्वः ॥ इत्यमरटीकायां भरतः ॥ तस्य लक्षणान्तरम् ।
“चतुर्योजनपर्य्यन्तमधिकारं नृपस्य च ।
यो राजा तच्छतगुणः स एव मण्डलेश्वरः ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८६ अध्यायः ॥

मण्डहारकः, पुं, (मण्डं हरति आहरति गृह्णातीति । हृ + “ण्वुल्तृचौ ।” ३ । १ । १३३ । इति ण्वुल् । सुरासम्पादनार्थं मण्डग्रहणादस्य तथात्वम् ।) शौण्डिकः । इत्यमरः । १ । २ । १० ॥

मण्डा, स्त्री, (मण्डः कारणत्वेनास्ति अस्या इति अर्श आदिभ्योऽच् । टाप् ।) सुरा । इति हारावली ॥ (मण्डयतीति । मडि + अच् । टाप् ।) आमलकी । इति मेदिनी । डे, २२ ॥

मण्डितः, पुं, बौद्धगणाधिपविशेषः । इति हेमचन्द्रः । (मडि + कर्म्मणि क्तः ।) भूषिते त्रि । इत्यमरः । ३ । २ । १०० ॥ (यथा, गीतगोविन्दे । २ । ७ ।
“मणिमयमकरमनोहर-
कुण्डलमण्डितगण्डमुदारम् ।”)

मण्डूकः, पुं, (मण्डयति भूषयति जलाशयमिति मडि + “शलिमण्डिभ्यामूकण्” उणा० ४ ।४२। इति ऊकण् ।) भेकः । इत्यमरः । १ । १० । २४ ॥ (यथा, मनुः । ४ । १२६ ।
“पशुमण्डूकमार्ज्जारश्वसर्पनकुलाखुभिः ।
अन्तरागमने विद्यादनध्यायमहर्निशम् ॥”
भेकार्थे पर्य्याया गुणाश्च यथा,—
“मण्डूकः प्लवगो भेको वर्षाभूर्दर्दुरो हरिः ।
मण्डूकः श्लेष्मलो नातिपित्तलो बलकारकः ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥) शोणकः । मुनिविशेषः । इति मेदिनी । के, १३६ ॥ गाढ़तिना । इति शब्दरत्नावलि ॥ बन्धविशेषे क्ली । इति विश्वः ॥ (अश्वजातिभेदः । यथा, महाभारते । २ । २८ । ६ ।
“तत्र तित्तिरिकल्माषान् मण्डूकाख्यान् हयोत्तमान् ।”)

मण्डूकपर्णः, पुं, (मण्डूकाकृति पर्णमस्य । यद्वा, मण्डूक इवोत्तानोदरं पर्णमस्य ।) श्योनाकवृक्षः । इत्यमरः । ४ । २ ।५६ ॥ (तथाचास्य पर्य्यायः ॥
“श्योनाकः शोषणश्च स्यान्नटकट्वङ्गटुण्टुकः ।
मण्डूकपर्णपत्त्रोर्णशुकनासकुटन्नटाः ॥
दीर्घवृन्तोरलुश्चापि पृथुशिम्बः कटम्भरः ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।) शोणकः । इति मेदिनी । णे, ११५ ॥

मण्डूकपर्णी, स्त्री, (मण्डूकपर्ण । गौरादित्वात् ङीष् ।) मञ्जिष्ठा ॥ (यथास्याः पर्य्यायः ।
“मञ्जिष्ठा विकसा जिङ्गी समङ्गा कालमेषिका
मण्डूकपर्णी भण्डीरी भण्डी योजनवल्ल्यपि ॥
रसायन्यरुणा काला रक्ताङ्गी रक्तयष्टिका ।
भण्डीतकी च गण्डीरी मञ्जूषा वस्त्ररञ्जिनी ॥”)
ब्राह्मणी इति मेदिनी । णे, ११५ ॥ आदित्यभक्ता । इति राजनिर्घण्टः ॥ ओषधिविशेषः । थुलकुड़ी इति भाषा । तत्पर्य्यायः । भेकी २ मण्डूकी ३ ब्रह्मपर्णी ४ । इति रत्नमाला ॥ मण्डूकपर्णिका ५ । अस्या गुणाः । मण्डूकपर्णिका लघ्वी स्वादुपाका रसा हिमा । (महौषध्यर्थे पर्य्यायान्तरं यथा,—
“मण्डूकपर्णी माण्डूकी त्वाष्ट्री दिव्या महौषधी ।”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
तथाचास्या गुणाः ॥
कषाया तु हिता पित्ते स्वादुपाकरसा हिमा ।
लघ्वी मण्डूकपर्णी तु तद्वज्ज्ञोनिक्षिका मता ॥
इति सुश्रुते सूत्रस्थाने ४६ अध्याये ।)
पाठान्तरम् । मण्डूकपर्णिका लघ्वी रूक्षा वातविबन्धनुत् । इति राजवल्लभः ॥

मण्डूकमाता, [ऋ] स्त्री, (मण्डूकस्य मातेव मण्डूकपोषकत्वादस्यास्तथात्वम् ।) ब्राह्मी । इति राजनिर्घण्टः ॥ भेकमाता च ॥

मण्डूका, स्त्री, (मण्डूक + स्त्रियां टाप् ।) मञ्जिष्ठा । यथा, शब्दमालायाम् ।
“मण्डूका च लता यष्टिर्हेमपुष्पी च भण्डिरी ।”

मण्डूकी, स्त्री, (मण्डूक + स्त्रियां ङीष् ।) मण्डूकपर्णी । इति मेदिनी । के,१३७॥ आदित्यभक्ता । ब्राह्मी । इति राजनिर्घण्टः ॥ क्षुपविशेषः । इति रत्नमाला ॥ थुलकुड़ी । इति भाषा । दुष्टयोषित् । इति शब्दरत्नावली ॥

मण्डूरं, क्ली, पुं, लौहमलम् । तत्पर्य्यायः । शिङ्घाणम् २ । इत्यमरः । २ । ९ । ९८ ॥ सिंहानं ३ । सिंहाणं ४ । मण्डते लोहं वेष्टते आश्रिदाहे लोहाद्विभजते वा मण्डयति भूषयति औषधत्वाद्रोगिणमिति वा मण्डूरं कि मडि भूषे मडि इ विभागे वेष्टे वाम्नोति ऊरः । इति तट्टीकायां भरतः ॥ अस्य गुणः । लौहगुणतुल्यः । शतवर्षीयं मण्डूरमुत्तमम् । अशीतिवर्षीयं मध्यमम् । षष्टिवर्षीयमधमम् । अतो न्यूनं विषतुल्यम् । यथा,—
“यल्लोहं यद्गुणं प्रोक्तं तत्किट्टञ्चापि तद्गुणम् ।
शतोर्द्ध्वमुत्तमं किट्टं मध्यञ्चाशीतिवार्षिकम् ॥
अधमं षष्टिवर्षीयं ततो हीनं विषोपमम् ॥”
इति रसेन्द्रचिन्तामणिः ॥
(तथा चास्य पर्य्यायान्तरम् । मण्डूरं लोहजं किट्टम् । इति वैद्यकरत्नमालायाम् ॥ अस्य उत्पत्तिर्गुणाश्च यथा,—